श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ नावल्पाकमणिमाला ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ नावल्पाकमणिमाला ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

सुमशरशतगर्वाक्षेपदक्षस्ववर्ष्मा
हिमकरसहजातावासभूर्यस्य वक्षः।
समकरसरितस्तत्सन्निधौ सन्निविष्टः
मम करयुगभूतेरञ्जलेरस्तु लक्ष्यम्॥ १ ॥

यथा क्रतूनां महितोऽश्वमेधः
तथा सुराणां महितोऽश्ववक्त्रः।
इतीदमालोच्य हि देशिकेन्द्राः
लक्ष्यं क्रतूनां तमिमं भजन्ति॥ २ ॥

भजतां मधुजिद्वचोविलासं
कलयत्येष रमातुरङ्गवक्त्रः।
मधुजित्पदकीर्तितः पुराणे
तदयं हीति भजन्ति देशिकेन्द्राः॥ ३ ॥

सुधांशुबिम्बस्थितदिव्यदेहं
विधातृयोषिद्विनताङ्घ्रिपद्मम्।
सुधाझरीतुल्यवचःप्रवाहैः
तथाविधं धाम विभाति किञ्चित्॥ ४ ॥

आकन्धरमादिपुमान्
उपरि च गन्धर्वनाथसन्तानः।
इन्धे कश्चन हृदये
किं धाताप्यस्ति मामलङ्कर्तुम्॥ ५ ॥

www.prapatti.com

जम्बूद्वीपे विबुधमहिते श्रीविलासास्पदेऽस्मिन्
जम्बूपाके विबुधमहिते श्रीनिवासास्पदेऽस्मिन्।
जम्बूवर्णं वपुषि वहतस्सम्पदृक्षेऽभिजातः
जम्बूरागं मनसि च गुरुस्सम्पदे नस्समिन्धे॥ ६॥

मृगशिरसि धरण्यामुद्गतो देशिकेन्द्रः
मृगशिरसि कलानामास्पदे सक्तबुद्धिः।
मृगशिरसि हिरण्याक्षेपकेऽप्येष कुर्यात्
मृगशिरसि निवेश्यान् मादृशान् ज्ञानपूर्णान्॥ ७॥

श्रीरामानुजजन्मर्क्षमध्यर्क्षे सम्भवन् गुरुः।
आचार्यतां च दैवत्वमात्मनो ज्ञापयत्यसौ॥ ८॥

व्याख्यां सारावलेर्यामतनुत भगवान् सुन्दरार्यो गुरुर्नः
व्याख्यां श्रीतत्त्वसारस्य च गुरुमहितग्रन्थरत्नोत्तमस्य।
योऽयं सोऽयं यदीयं पदकमलयुगं मस्तके संविधत्ते
नित्यं तस्मै नमस्तात् सकलभवुकभूम्यण्णयार्योत्तमाय॥ ९॥

उन्नयामि विनतानिति हर्षात्
अन्नयन्तममुमण्णयमाहुः।
एतदानतहयास्यसेविनी
भारतीललितभारतीविदः॥ १०॥

श्रीकान्तरामानुजसम्पदृक्षं
श्रीदान्तरामानुजहृद्यमीडे।
वेदान्तरामानुजमौलिवन्द्यं
वेदान्तरामानुजपादसक्तम्॥ ११॥

श्रीमद्भाष्यसुवर्णभूषिततनुं श्रीवक्त्रवाणीरसैः
सम्यङ्मोहितसर्वलोकहृदयां शान्तां च कान्तां तथा।
भूयोभिस्सुमनः कुलैरपि धृतां वेदान्तरामामहं
तद्भ्रातुर्गुरुसत्तमस्य समितौ लीलावतीं चिन्तये॥ १२॥

www.prapatti.com

ना विल् रामं मनसि सततं संवहन् सीतये तं
नाविल् रामामपि भगवतो नाभिपद्मोत्थितस्य।
नाविल्पाके विरचितजनैः सन्मणेस्सत्सभायां
ना विल्लूरान् इति कृतिमुदे किञ्चन व्याजहार॥ १३॥

॥ इति नावल्पाकमणिमाला समाप्ता॥

www.prapatti.com